.. અથ પશુપત્યષ્ટકમ્।।

ધ્યાનમ્ .

ધ્યાયેન્નિત્યં મહેશં રજતગિરિનિભં ચારુચન્દ્રાવતંસં
રત્નાકલ્પોજ્જ્વલાઙ્ગં પરશુમૃગવરાભીતિહસ્તં પ્રસન્નમ્ .
પદ્માસીનં સમન્તાત્સ્તુતમમરગણૈર્વ્યાઘ્રકૃત્તિં વસાનં
વિશ્વાદ્યં વિશ્વબીજં નિખિલભયહરં પચવક્ત્રં ત્રિનેત્રમ્ ..

સ્તોત્રમ્ .

પશુપતીન્દુપતિં ધરણીપતિં ભુજગલોકપતિં ચ સતી પતિમ્।।
ગણત ભક્તજનાર્તિ હરં પરં ભજત રે મનુજા ગિરિજાપતિમ્ ।। ૧।।
ન જનકો જનની ન ચ સોદરો ન તનયો ન ચ ભૂરિબલં કુલમ્।।
અવતિ કોડપિ ન કાલવશં ગતં ભજત રે મનુજા ગિરિજાપતિમ્ ।। ૨।।
મુરજડિણ્ડિવાદ્યવિલક્ષણં મધુરપચમનાદવિશારદમ્।।
પ્રથમભૂત ગણૈરપિ સેવિતં ભજત રે મનુજા ગિરિજાપતિમ્ ।। ૩।।
શરણદં સુખદં શરણાન્વિતં શિવ શિવેતિ શિવેતિ નતં નૃણામ્।।
અભયદં કરુણા વરુણાલયં ભજત રે મનુજા ગિરિજાપતિમ્ ।। ૪।।
નરશિરોરચિતં મણિકુણ્ડલં ભુજગહારમુદં વૃષભધ્વજમ્।।
ચિતિરજોધવલી કૃત વિગ્રહં ભજત રે મનુજા ગિરિજાપતિમ્ ।। ૫।।
મુખવિનાશઙ્કરં શશિશેખરં સતતમધ્વરં ભાજિ ફલપ્રદમ્।।
પ્રલયદગ્ધસુરાસુરમાનવં ભજત રે મનુજા ગિરિજાપતિમ્ ।। ૬।।
મદમ પાસ્ય ચિરં હૃદિ સંસ્થિતં મરણ જન્મ જરા ભય પીડિતમ્।।
જગદુદીક્ષ્ય સમીપભયાકુલં ભજત રે મનુજા ગિરિજાપતિમ્ ।। ૭।।
હરિવિરિચિસુરાધિપ પૂજિતં યમજનેશધનેશનમસ્કૃતમ્।।
ત્રિનયનં ભુવન ત્રિતયાધિપં ભજત રે મનુજા ગિરિજાપતિમ્ ।। ૮।।
પશુપતેરિદમષ્ટકમદ્ભુતં વિરિચિત પૃથિવી પતિ સૂરિણા।।
પઠતિ સંશૃનુતે મનુજઃ સદા શિવપુરિં વસતે લભતે મુદમ્ ।। ૯।।